नारदेन स्पष्टोक्तं "आदौ तु कारणन्दानं मध्ये भुक्तिस्तु सागमा। कारणं भुक्तिरेवैका सन्तता या चिरन्तनीति" "पश्यतो ब्रुवत इत्यत्र विंशतिवर्षभोगादूर्द्धं भूमेर्द्धनस्यापि दशवर्षभोगादूर्द्धं फलानुसरणं न भवतीत्युक्तम्। तत्र फलानुसरणवद्दण्डानुसरणमपि न भविष्यतीत्याशङ्क्य पुरुषव्यवस्थया प्रमाणव्यवस्थया च दण्डव्यवस्थां दर्शयितुमाह। "आगमस्तु कृतोयेन सोऽभियुक्तस्तमुद्धरेत्। न तत्सुतस्तत्सुतो वा भुक्तिस्तत्र गरीयसी" या०। येन पुरुषेण भूम्यादेरागमःस्वीकारः कृतः। स पुरुषः कुतस्ते क्षेत्रादिकमित्यभियुक्तस्तमागमं प्रतिग्रहादिकं लिखितादिभिरुद्धरेत् भावयेत्। अनेनचाद्यपुरुषस्यागममनुद्धरतोदण्ड इत्युक्तं भवति तत्सुतो द्वितीयोऽभियुक्तोनागममुद्धरेत्, किन्तु अविच्छिन्नाप्रतिरवसमक्षभोगम्। अनेनचागममनुद्धरतो द्वितीयस्य न दण्डोऽपि तु विशिष्टम्भोगमनुद्धरतो दण्ड इति प्रतिपादितम्। तत्सुतस्तृतीयोनागमं नापि विशिष्टम्भोगमुद्धरेदपि तु क्रमागतम्भोगमात्रम्। अनेनापि तृतीयस्य क्रमायातभोगानुद्धरणे दण्डोनागमानुद्धरणे न विशिष्टभोगानुद्धरणे वेत्यभिहितम्। तत्र तयोर्द्वितीययोर्भुक्तिरेव गरीयसी। तत्रापि द्वितीये गुरुः तृतीये गरीयसीति विवेक्तव्यम्।त्रिष्वप्यागमानुद्धरणेऽर्थहानिः समानैव दण्डे तु विशेष इति तात्पर्य्यार्थः। उक्तञ्च। "आगमस्तु कृतोयेन स दण्ड्यस्तमनुद्धरन्। न तत्सुतस्तत्सुतो वा भोगहानिस्तयोरपि"। अस्मार्त्तकालोपभोगस्यागमज्ञाननिरपेक्षस्य प्रामाण्यमुक्तं विना पूर्व्वक्रमागतादित्यत्र तस्यापवादमाह। "योऽभियुक्तः परेतः स्यात्तस्य रिक्थी तमुद्धरेत्। न तत्र कारणम्भुक्तिरागमेन विनाकृता" या० यदा पुनराहर्त्त्रादिरभियुक्तोऽकृतव्यवहारनिर्णय एव परेतःस्यात्परलोकगतोभवेत्तदा तस्य रिक्थी पुत्रादि स्तमागममुद्धरेत्। यस्मात्तत्र तस्मिन् व्यवहारे भुक्तिरागमरहिता साक्ष्यादिभिः साधितापि न प्रमाणम्।" व्यव०त०रघुनन्दनेन तु षष्ट्यब्दएव स्मार्त्तकालतया उक्तः। यथा तद्धृतं व्यासवाक्यम् "वर्षाणि विंशतिं भुक्ता स्वामिनाऽव्याहृता मही। भुक्तिः सा पौरुषी भूमेर्द्विगुणा तु द्विपौरुषी। त्रिपौरुषी तु त्रिगुणा न तत्रान्वेष्य आगम" इति। त्रिपुरुषभोगे विशेषमाह तत्रैव व्यासः। प्रपितामहभुक्तं यत् तत्पुत्रेण विना च तम्। तौ विना यस्य पिता च तस्य भोगस्त्रिपौरुषः। पिता पितामहोयस्य जीवेच्च प्रपितामहः। त्रयाणां जीवतां भोगो विज्ञेयस्त्वेकपुरुषः" इति एवञ्च शतषष्टिवर्षयोः स्मार्त्तकालत्वं देशभेदात् व्यवस्थापनीयम्। अत्रापवादः। "भुक्तिस्त्रैपौरुषी सिध्येदपरेषां न संशयः। अनिवृत्ते सपिण्डत्वे सकुल्यानां न सिध्यति। अस्वामिना च यद्भुक्तं गृहक्षेत्रापणादिकम्। सुहृद्बन्धुसकुल्यस्य न तद्भोगेन हीयते। विवाह्यश्रोत्रियैर्भुक्तं राज्ञाऽमात्यैस्तथैव च। सुदीर्घेणापि कालेन तेषां स्वत्वं न सिध्यति" वृह०। अत्रापि विशेषमाह तत्रैव "स्त्रीधनञ्च नृपेन्द्राणां कदाचन न जीर्य्यति। अनागमं भुज्यमानमपि वर्षशतैरपि" आगम्यते तत्त्वमनेन। ६तत्त्वावेदकशास्त्रे "तस्मादपि चासिद्धं परोक्षमाप्तागमात् सिद्धम्" सा०का०। "सिद्धं सिद्धैः प्रमाणैस्तु हितं चात्र परत्र वा आगमः शास्त्रमाप्तानामाप्तास्तत्त्वार्थवेदिनः" इत्युक्ते ७शास्त्रमात्रे "श्रद्दधतां जायते भक्तिस्ततो गुरुमुपासते। स च विद्यागमान् वक्ति विद्यायुक्तस्यान्वितो नृप!" देवीपु०। स च गुरुः विद्यासाधनमागमं वक्ति उपदिशतीत्यर्थः। ८वेदे च "रक्षोहागमलघ्वसन्देहाः प्रयोजनम्" "आगमः खल्वपि ब्राह्मणेन निष्कारणो धर्मः षड़ङ्गोवेदोऽध्येयः ज्ञेयश्चेति" म०भा०। "आगमः प्रयोजकः प्रवर्त्तकः नित्यकर्मतां व्याकरणाध्ययनस्य दर्शयति प्रयोजनशब्देन फलं प्रयोजकस्येति कैयटः। "आगमपदेन श्रुतिरिति" उद्योतः। "बहवोऽप्यागमैर्भिन्नाः पन्थानः सिद्धिहेतवः" रघुः। ९ मन्त्रे च "सर्ववेदः क्रियामूलं ऋषिभिर्बहुधोदितः। कालोदेशः क्रिया कर्त्ता कारणं कार्य्यमागमः। द्रव्यं फलमिदं ब्रह्मन्नवरोक्तोऽजयाहरिः"। भा०१२,११अध्या० "तत्र कालः प्रातरादिः देशः समादिः क्रियाऽनुष्ठानं कर्त्ता ब्राह्मणादि, कारणं स्रुवादि कार्य्यं यागादि आगमोमन्त्रादिः द्रव्यं व्रीह्यादि फलं स्वर्गादि" इति श्रीधरः।

आ+गम—गत्यर्थत्वात् ज्ञाने भावे घञ्। १०शब्दजन्यबोधे "प्रत्यक्षमनुमानञ्च शास्त्रञ्च विविधागमम्। त्रयं सुविदितं कार्य्यं धर्म्मशुद्धिमभीप्सुना" मनुः। विविधानां धर्म्माणामागमोयस्मात्विविधागमम्। करणे घञ्। ११शाब्दबोधसाधने शब्दरूपप्रमाणे च "ऐन्द्रियमनुमानञ्च प्रत्यक्षमपि चागमम्। ये तु सम्यक्परीक्षन्ते कुतस्तेषामबुद्धिता" रामा० "आगतः शिववक्त्रेभ्यो गतश्च गिरिजानने। मतञ्च हृदयाम्भोजे तस्मादागम उच्यते" यामलोक्ते १२ तन्त्रशास्त्रे पुं न० तथा च आगतादीनामाद्यक्षरयुक्तत्वात् तथात्वम्